॥ श्रीगणेशायनमः ॥

अथभागवतमाहात्म्यारम्भः

प्रथमोऽध्यायः

शाण्डिल्योपदिष्टव्रजभूमिमाहात्म्यवर्णनम्

व्यास उवाच

श्रीसच्चिदानन्दघनस्वरूपिणे कृष्णाय चानन्तसुखाभिवर्षिणे ।
विश्वोद्भवस्थाननिरोधहेतवे नुमो वयं भक्तिरसाप्तयेऽनिशम् ॥ १ ॥

नैमिषे सूतमासीनमभिवाद्य महामतिम् । कथामृतरसास्वादकुशला ऋषयोऽब्रुवन् ॥

ऋषय ऊचुः

वज्रं श्रीमाथुरे देशे स्वपौत्रंहस्तिनापुरे । अभिषिच्यगतेराज्ञि तौ कथं किञ्चचक्रतुः

सूत उवाच

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

महापथं गते राज्ञि परीक्षित्पृथिवीपतिः । जगाम मथुरां विप्रा वज्रनाभदिदृक्षया

पितृव्यमागतं ज्ञात्वा वज्रः प्रेमपरिप्लुतः । अभिगम्याभिवाद्याथनिनायनिजमन्दिरम्

परिष्वज्य स तं वीरः कृष्णैकगतमानसः । रोहिण्याद्या हरेः पत्नीर्ववन्दायतनागतः

ताभिः सम्मानितोऽत्यर्थं परीक्षित्पृथिवीपतिः ।
विश्रान्तः सुखमासीनो वज्रनाभमुवाच ह ॥ ८ ॥

श्रीपरीक्षिदुवाच

तात! त्वत्पितृभिर्नूनमस्मत्पितृपितामहः । उद्धृता भूरिदुःखौघादहञ्च परिरक्षितः

न पारयाम्यहं तात साधु कृत्वोपकारतः । त्वामतः प्रार्थयाम्यङ्गसुखंराज्येऽनुज्यताम्

कोशसैन्यादिजा चिन्ता तथारिदमनादिजा ।
मनागपि न कार्या ते सुसेव्याः किन्तु मातरः ॥ ११ ॥

निवेद्य मयि कर्तव्यं सर्वाधिपरिवर्ज्जनम् । श्रुत्वैतत्परमप्रीतो वज्रस्तं प्रत्युवाच ह

श्रीवज्रनाभ उवाच

राजन्नुचितमेतत्ते यदस्मासु प्रभाषते । त्वत्पित्रोपकृतश्चाहं धनुर्विद्याप्रदानतः ॥१३॥

तस्मान्नाल्पाऽपि मे चिन्ता क्षात्रं दृढमुपेयुषः ।
किन्त्वेका परमा चिन्ता तत्र किञ्चिद्विचार्य्यताम् ॥ १४ ॥

माथुरेत्वभिषिक्तोऽपिस्थितोऽहंनिर्ज्जनेवने । क्वगतावैप्रजाऽत्रत्यायत्रराज्यम्प्ररोचते

इत्युक्तोविष्णुरातस्तुनन्दादीनांपुरोहितम् । शाण्डिल्यमाजुहावाशु वज्रसन्देहनुत्तये

अथोटजंविहायाऽऽशुशाण्डिल्यःसमुपागतः । पूजितोवज्रनाभेननिषसादाऽऽसनोत्तमे

उपोद्घातं विष्णुरातश्चकाराशु ततस्त्वसौ । उवाचपरमप्रीतस्तावुभौ परिसान्त्वयन्

श्रीशाण्डिल्य उवाच

शृणुतं दत्तचित्तौ मेरहस्यंव्रजभूमिजम् । व्रजनंव्याप्तिरित्युक्त्याव्यापनाद्व्रजउच्यते

गुणातीतं परब्रह्म व्यापकं व्रज उच्यते । सदानन्दम्परं ज्योतिर्मुक्तानां पदमव्ययम्

तस्मिन्नन्दात्मजः कृष्णः सदानन्दाङ्गविग्रहः ।
आत्मारामश्चाऽऽप्तकामः प्रेमाक्तैरनुभूयते ॥ २१ ॥

आत्मा तु राधिकातस्यतयैवरमणादसौ । आत्मारामतयाप्राज्ञैः प्रोच्यते गूढवेदिभिः

कामास्तु वाञ्छितास्तस्य गावो गोपाश्च गोपिकाः ।
नित्याः सर्वे विहाराद्या आप्तकामस्ततस्त्वयम् ॥ २३ ॥

रहस्यं त्विदमेतस्य प्रकृतेः परमुच्यते । प्रकृत्या खेलतस्तस्य लीलाऽन्यैरनुभूयते

सर्गस्थित्यप्ययायत्ररजःसत्त्वतमोगुणैः । लीलैवंद्विविधातस्यवास्तवीव्यावहारिकी

वास्तवी तत्स्वसम्वेद्या जीवानां व्यावहारिकी ।
आद्यां विना द्वितीया न द्वितीया नाद्यगा क्वचित् ॥ २६ ॥

आवयोर्गोचरेयन्तु तल्लीला व्यावहारिकी । यत्र भूरादयोलोकाभुवि माथरमण्डलम्
अत्रैव व्रजभूमिः सा यत्र तत्त्वं सुगोपितम् । भासते प्रेमपूर्णानांकदाचिदपिसर्वतः
कदाजिद्द्वापरस्याऽन्तेरहोलीलाधिकारिणः । समवेतायदाऽत्रस्युर्यथेदानींतदाहरिः
स्वैःसहावतरेत्स्वेषुसमावेशार्थमीप्सिताः । तदा देवादयोऽप्यन्येऽवतरन्तिसमन्ततः

सर्वेषां वाञ्छितं कृत्वा हरिरन्तर्हितोऽभवत् ।
तेनाऽत्र त्रिविधा लोकाः स्थिताः पूर्वं न संशयः ॥ ३१ ॥

नित्यास्तल्लिप्सवश्चैवदेवाद्याश्चेतिभेदतः । देवाद्यास्तेषुकृष्णेन द्वारिकाम्प्रापिताःपुरा
पुनर्मौलशमार्गेण स्वाधिकारेषु चापिताः । तल्लिप्सूंश्च सदाकृष्णप्रेमानन्दैकरूपिणः
विधायस्वीयनित्येषुसमावेशितवांस्तदा । नित्याःसर्वेऽप्ययोग्येषुदर्शनाभावताङ्गताः

व्यावहारिकलीलास्थास्तत्र यन्नाधिकारिणः ।
पश्यन्त्यत्रागतास्तस्मान्निर्ज्जनत्वं समन्ततः ॥ ३५ ॥

तस्माच्चिन्तानतेकार्यावज्रनाभ!मदाज्ञया । वासयात्रबहून्ग्रामान्संसिद्धिस्तेभविष्यति
कृष्णलीलानुसारेणकृत्वानामानिसर्वतः । त्वया वासयताग्रामान्संसेव्याभूरियम्परा
गोवर्द्धने दीर्घपुरे मथुरायां महावने । नन्दिग्रामे बृहत्सानौकार्या राजस्थितिस्त्वया

नद्यद्रिद्रोणकुण्डादिकुञ्जान्संसेवतस्तव ।
राज्ये प्रजाः सुसम्पन्नास्त्वञ्च प्रीतो भविष्यसि ॥ ३६ ॥

सच्चिदानन्दभूरेषा त्वया सेव्या प्रयत्नतः । तवकृष्णस्थलान्यत्र स्फुरन्तुमदनुग्रहात्

वज्र! संसेवनादस्या उद्धवस्त्वां मिलिष्यति ।
ततो रहस्यमेतस्मात्प्राप्स्यसि त्वं समातृकः ॥ ४१ ॥
एवमुक्त्वा तु शाण्डिल्यो गतः कृष्णमनुस्मरन् ।
विष्णुरातोऽथ वज्रश्च परां प्रीतिमवापतुः ॥ ४२ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीयेवैष्णवखण्डे
श्रीमद्भागवतमाहात्म्ये शाण्डिल्योपदिष्टव्रजभूमिमाहात्म्यवर्णनंनाम
प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

गोवर्द्धनसमीपेपरीक्षिदादीनामुद्धवदर्शनवर्णनम्

श्रीऋषय ऊचुः

शाण्डिल्ये तौ समादिश्य परावृत्ते स्वमाश्रमम् ।
किं कथं चक्रतुस्तौ तु राजानौ सूत तद्वद ॥ १ ॥

श्रीसूत उवाच

ततस्तुविष्णुरातेनश्रेणीमुख्याःसहस्रशः । इन्द्रप्रस्थात्समानाय्यमथुरास्थानमापिताः
माथुरान्ब्राह्मणांस्तत्रवानरांश्चपुरातनान् । विज्ञायमाननीयत्वंतेषुस्थापितवान्स्वराट्

वज्रस्तु तत्सहायेन शाण्डिल्यस्याऽप्यनुग्रहात् ।
गोविन्दगोपगोपीनां लीलास्थानान्यनुक्रमात् ॥ ४ ॥
विज्ञायाऽभिधयाऽऽस्थाप्य ग्रामानावासयद्बहून् ।
कुण्डकूपादिपूर्तेन शिवादिस्थापनेन च ॥ ५ ॥

गोविन्दहरिदेवादिस्वरूपाऽऽरोपणेन च । कृष्णैकभक्तिस्वे राज्ये ततान च मुमोदह
प्रजास्तुमुदितास्तस्य कृष्णकीर्तनतत्पराः । परमानन्दसम्पन्नाराज्यं तस्यैव तुष्टुवुः
एकदाकृष्णपत्न्यस्तुश्रीकृष्णविरहातुराः । कालिन्दींमुदितांवीक्ष्यपप्रच्छुर्गतमत्सराः

श्रीकृष्णपत्न्य ऊचुः

यथा वयं कृष्णपत्न्यस्तथा त्वमपि शोभने । वयंविरहदुःखार्तास्त्वंनकालिन्दितद्वद

तच्छ्रुत्वा स्मयमाना सा कालिन्दी वाक्यमब्रवीत् ।
सापत्न्यं वीक्ष्य तत्तासां करुणापरमानसा ॥ १० ॥

श्रीकालिन्द्युवाच

आत्मारामस्य कृष्णस्य ध्रुवमात्माऽस्ति राधिका ।
तस्या दास्यप्रभावेण विरहोऽस्मान्न संस्पृशेत् ॥ ११ ॥

तस्या एवांऽशविस्ताराः सर्वाः श्रीकृष्णनायिका ।
नित्यसम्भोग एवास्ति तस्याः साम्मुख्ययोगतः ॥ १२ ॥

सएवसाससैवास्तिवंशीतत्प्रेमरूपिका। श्रीकृष्णनखचन्द्रालिसङ्गाच्चन्द्रावलीस्मृता रूपान्तरंचगृह्णानांतयोःसेवातिलालसा। रुक्मिण्यादिसमावेशोमयाऽत्रैवविलोकितः युष्माकमपिकृष्णेनविरहोनैवसर्वतः। किन्तुएवं न जानीथ तस्माद्व्याकुलतामिताः एवमेवात्र गोपीनामक्रूरावसरे पुरा। विरहाभास एवासीदुद्धवेन समाहितः ॥ १६ ॥ तेनैव भवतीनां चेद्भवेदत्र समागमः। तर्हि नित्यं स्वकान्तेन विहारमपिलप्स्यथ ॥

श्रीसूत उवाच

एवमुक्तास्तु ताः पत्न्यः प्रसन्नां पुनरब्रुवन्। उद्धवालोकनेनात्मप्रेष्ठसङ्गमलालसाः ॥

श्रीकृष्णपत्न्य ऊचुः

धन्याऽसि सखि! कान्तेन यस्या नैवाऽस्ति विच्युतिः ।
यतस्ते स्वार्थसंसिद्धिस्तस्या दास्यो बभूविम ॥ १९ ॥
परन्तूद्धवलाभे स्यादस्मत्सर्वार्थसाधनम् ।
तथा वदस्व कालिन्दि! तल्लाभोऽपि यथा भवेत् ॥ २० ॥

श्रीसूत उवाच

एवमुक्तानुकालिन्दीप्रत्युवाचाथतास्तथा। स्मरन्तीकृष्णचन्द्रस्यकलाषोडशरूपिणी

साधनभूमिर्बदरी व्रजता कृष्णेन मन्त्रिणे प्रोक्ता ।
तत्रास्ते स तु साक्षात्तद्वयुनं ग्राहयंल्लोकान् ॥ २२ ॥
फलभूमिर्व्रजभूमिर्दत्ता तस्मै पुरैव सरहस्यम् ।
फलमिह तिरोहितं सत्तदिहेदानीं स उद्धवोऽलक्ष्यः ॥ २३ ॥
गोवर्द्धनगिरिनिकटे सखीस्थले तद्रजःकामः ।
तत्रत्याङ्कुरवल्लीरूपेणाऽऽस्ते स उद्धवो नूनम् ॥ २४ ॥
आत्मोत्सवरूपत्वं हरिणा तस्मै समर्पितं नियतम् ।
तस्मात्तत्र स्थित्वा कुसुमसरःपरिसरे सव्रजाभिः ॥ २५ ॥

वीणावेणुमृदङ्गैः कीर्तनकाव्यादिसरससङ्गीतैः ।
उत्सव आरब्धव्यो हरिरतलोकान्समानाय्य ॥ २६ ॥
तत्रोद्धवावलोको भविता नियतं महोत्सवे वितते ।
यौष्माकीणामभिमतसिद्धिं सविता स एव सवितानाम् ॥ २७ ॥

श्रीसूत उवाच

इति श्रुत्वा प्रसन्नास्ताः कालिन्दीमभिवन्द्य तत् ।
कथयामासुरागत्य वज्रंप्रति परीक्षितम् ॥ २८ ॥

विष्णुरातस्तु तच्छ्रुत्वा प्रसन्नस्तद्युतस्तदा। तत्रैवागत्य तत्सर्वं कारयामासत्वरम् गोवर्धनाददूरेण वृन्दारण्ये सखीस्थले। प्रवृत्तः कुसुमाम्भोधौ कृष्णसङ्कीर्तनोत्सवः वृषभानुसुताकान्तविहारे कीर्तनश्रिया। साक्षादिव समावृत्ते सर्वेऽनन्यदृशोऽभवन्

ततः पश्यत्सु सर्वेषु तृणगुल्मलताचयात् ।
आजगामोद्धवः स्रग्वी श्यामः पीताम्बरावृतः ॥ ३२ ॥

गुञ्जामालाधरो गायन्वल्लवीवल्लभं मुहुः। तदागमनतो रेजे भृशं सङ्कीर्तनोत्सवः चन्द्रिकामगतोयद्वत्स्फाटिकाट्टालभूमणिः। अथसर्वेसुखाम्भोधौमग्नाःसर्वंविसस्मरुः क्षणेनागतविज्ञानाद्दृष्ट्वा श्रीकृष्णरूपिणम्। उद्धवं पूजयाञ्चक्रुः प्रतिलब्धमनोरथाः ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीमद्भागवतमाहात्म्ये गोवर्द्धनपर्वतसमीपे परीक्षिदादीनामुद्धवदर्शनवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

श्रीमद्भागवतमाहात्म्येपरीक्षिदुद्धवसम्वादवर्णनम्

श्रीसूत उवाच

अथोद्धवस्तु तान्दृष्ट्वा कृष्णकीर्तनतत्परान्। सत्कृत्याथ परिष्वज्यपरीक्षितमुवाचह

उद्धव उवाच

धन्योऽसि राजन्कृष्णैकभक्त्या पूर्णोऽसि नित्यदा।
यस्त्वं निमग्नचित्तोऽसि कृष्णसङ्कीर्तनोत्सवे ॥ २ ॥

कृष्णपत्नीषु वज्रे च दिष्ट्या प्रीतिः प्रवर्तिता। तवोचितमिदंतातकृष्णदत्ताङ्गवैभव द्वारकास्थेषु सर्वेषु धन्या एते न संशयः। येषां व्रजनिवासाय पार्थमादिष्टवान्प्रभुः श्रीकृष्णस्य मनश्चन्द्रो राधास्यप्रभयान्वितः। तद्विहारवनं गोभिर्मण्डयन्रोचतेसदा

कृष्णचन्द्रः सदा पूर्णस्तस्य षोडश याः कलाः।
चित्सहस्रप्रभाभिन्ना अत्रास्ते तत्स्वरूपता ॥ ६ ॥

एवं वज्रस्तु राजेन्द्र! प्रपन्नभयभञ्जकः। श्रीकृष्णदक्षिणे पादे स्थानमेतस्य वर्तते अवतारेऽत्रकृष्णेनयोगमायाऽतिभाविता। तद्बलेनात्मविस्मृत्यासीदन्त्येतेनसंशयः

ऋते कृष्णप्रकाशं तु स्वात्मबोधोन कस्यचित्।
तत्प्रकाशस्तु जीवानां मायया पिहितः सदा ॥ ६ ॥

अष्टाविंशे द्वापरान्ते स्वयमेव यदा हरिः। उत्सारयेन्निजां मायां तत्प्रकाशोभवेत्तदा सतुकालो व्यतिक्रान्तस्तेनेदमपरं शृणु। अन्यदातत्प्रकाशस्तुश्रीमद्भागवाद्भवेत् श्रीमद्भागवतं शास्त्रं यत्रभागवतैर्यदा। कीर्त्यतेश्रूयतेचापिश्रीकृष्णस्तत्रनिश्चितम् श्रीमद्भागतं यत्र श्लोकं श्लोकार्द्धमेव च। तत्रापि भगवान्कृष्णो वल्लवीभिर्विराजते भारतेमानवं जन्म प्राप्य भागवतं न यैः। श्रुतं पापपराधीनैरात्मघातस्तु तैः कृतः॥ श्रीमद्भागवतंशास्त्रंनित्यंयैपरिसेवितम्। पितुर्मातुश्चभार्यायाःकुलपङ्क्तिःसुतारिता

विद्याप्रकाशो विप्राणां राज्ञां शत्रुजयो विशाम्।
धनं स्वास्थ्यञ्च शूद्राणां श्रीमद्भागवताद्भवेत् ॥ १६ ॥

योषितामपरेषाञ्च सर्ववाञ्छितपूरणम्। अतोभागवतं नित्यं कोन सेवेत भाग्यवान् अनेकजन्मसंसिद्धः श्रीमद्भागवतं लभेत्। प्रकाशो भगवद्भक्तेरुद्भवस्तत्र जायते साङ्ख्यायनप्रसादाप्तं श्रीमद्भागवतं पुरा। बृहस्पतिर्दत्तवान्मे तेनाऽहं कृष्णवल्लभः आख्यायिकाञ्चतेनोक्तां विष्णुरात! निबोधताम्। ज्ञायतेसम्प्रदायोऽपियत्रभागवतश्रुतेः

श्रीबृहस्पतिरुवाच

ईक्षाञ्चक्रे यदा कृष्णो माया पुरुषरूपधृक्। ब्रह्माविष्णुःशिवश्चापिरजःसत्त्वतमोगुणैः पुरुषास्त्रय उत्तस्थुरधिकारांस्तदादिशत्। उत्पत्तौ पालने चैव संहारे प्रक्रमेण तान्

ब्रह्मा तु नाभिकमलादुत्पन्नस्तं व्यजिज्ञपत्।

श्रीब्रह्मोवाच

नारायणादिपुरुष! परमात्मन्नमोऽस्तु ते ॥ २३ ॥
त्वया सर्गे नियुक्तोऽस्मि पापीयान्मां रजोगुणः।
त्वत्स्मृतौ नैव बाधेत तथैव कृपया प्रभो! ॥ २४ ॥

श्रीबृहस्पतिरुवाच

यदातु भगवांस्तस्मैश्रीमद्भागवतं पुरा। उपदिश्याऽब्रवीद्ब्रह्मन्सेवस्वैनत्स्वसिद्धये ब्रह्मातु परमप्रीतस्तेन कृष्णाप्तयेऽनिशम्। सप्तावरणभङ्गाय सप्ताहं समवर्तयत् ॥२६॥ श्रीभागवतसप्ताहसेवनाप्तमनोरथः। सृष्टिं वितनुते नित्यं ससप्ताहः पुनःपुनः ॥ २७॥ विष्णुरप्यर्थयामास पुमांसं स्वार्थसिद्धये। प्रजानां पालनेपुंसा यदनेनापिकल्पितः

श्रीविष्णुरुवाच

प्रजानां पालनं देव! करिष्यामियथोचितम्। प्रवृत्त्याचनिवृत्त्याचकर्मज्ञानप्रयोजनात् यदायदैव कालेन धर्मग्लानिर्भविष्यति। धर्मं संस्थापयिष्यामि ह्यवतारैस्तदा तदा

भोगार्थिभ्यस्तु यज्ञादिफलं दास्यामि निश्चितम्।
मोक्षार्थिभ्यो विरक्तेभ्यो मुक्तिं पञ्चविधां तथा ॥ ३१ ॥

येऽपि मोक्षं न वाञ्छन्ति तान्कथं पालयाम्यहम् ।
आत्मानञ्च श्रियश्चाऽपि पालयामि कथं वद ॥ ३२ ॥

तस्माअपि पुमानाद्यः श्रीभागवतमादिशत् । उवाच च पठस्वैनत्तव सर्वार्थसिद्धये
ततो विष्णुःप्रसन्नात्मापरमार्थकपालने । समर्थोऽभूच्छ्रियामासिमासिभागवतंस्मरन्
यदा विष्णुः स्वयं वक्ता लक्ष्मीश्च श्रवणे रता । तदा भागवतश्रावोमासेनैवपुनःपुनः
यदा लक्ष्मीः स्वयंवक्त्रीविष्णुश्चश्रवणेरतः । मासद्वयंरसास्वादस्तदातीवसुशोभते

अधिकारे स्थितो विष्णुर्लक्ष्मीर्निश्चिन्तमानसा ।
तेन भागवतास्वादस्तस्या भूरि प्रकाशते ॥ ३७ ॥

अथ रुद्रोऽपि तं देवं संहाराधिकृतः पुरा । पुमांसं प्रार्थयामासस्वसामर्थ्यविवृद्धये

श्रीरुद्र उवाच

नित्ये नैमित्तिके चैव संहारे प्राकृते तथा । शक्तयो मम विद्यन्ते देवदेव मम प्रभो
आत्यन्तिके तु संहारे मम शक्तिर्न विद्यते । महद्दुःखंममैतत्तु तेनत्वाम्प्रार्थयाम्यहम्

श्रीबृहस्पतिरुवाच

श्रीमद्भागवतं तस्मा अपि नारायणो ददौ । स तुसंसेवनादस्यजिग्येचापितमोगुणम्
कथा भागवती तेन सेविता वर्षमात्रतः । लये त्वात्यन्तिकेतेनाऽवापशक्तिंसदाशिवः

उद्धव उवाच

श्रीभागवतमहात्म्य इमामाख्यायिकांगुरोः । श्रुत्वाभागवतंलब्ध्वामुमुदेऽहंप्रणम्यतम्
ततस्तुवैष्णवींरीतिंगृहीत्वामासमात्रतः । श्रीमद्भागवतास्वादोमयासम्यङ्निषेवितः
तावतैव बभूवाऽहं कृष्णस्यदयितःसखा । कृष्णेनाथ नियुक्तोऽहं व्रजे स्वप्रेयसीगणे
विरहार्त्तासु गोपीषु स्वयं नित्यविहारिणा । श्रीभागवतसन्देशोमन्मुखेनप्रयोजितः
तं यथामति लब्ध्वाताआसन्विरहवर्जिताः । नाज्ञासिषंरहस्यंतच्चमत्कारस्तुलोकितः
स्ववासं प्रार्थ्य कृष्णश्च ब्रह्माद्येषु गतेषु मे । श्रीमद्भागवते कृष्णस्तद्रहस्यंस्वयंददौ
पुरतोऽश्वत्थमूलस्य चकार मयि तद्दृढम् । तेनाऽत्र व्रजवल्लीषु वसामि बदरींगतः
तस्मान्नारदकुण्डेऽत्रतिष्ठामिस्वेच्छयासदा । कृष्णप्रकाशोभक्तानांश्रीमद्भागवताद्भवेत्

तदेषामपिकार्य्यार्थंश्रीमद्भागवतंत्वहम् । प्रवक्ष्यामिसहायोऽत्रत्वयैवानुष्ठितोभवेत्

श्रीसूत उवाच

विष्णुरातस्तु श्रुत्वा तदुद्धवं प्रणतोऽब्रवीत् ।

श्रीपरीक्षिदुवाच

हरिदास! त्वया कार्यं श्रीभागवतकीर्तनम् ॥ ५२ ॥
आज्ञाप्योऽहं यथा कार्य्यं सहायोऽत्र मया तथा ।

श्रीसूत उवाच

श्रुत्वैतदुद्धवो वाक्यमुवाच प्रीतमानसः ॥ ५३ ॥

उद्धव उवाच

श्रीकृष्णेन परित्यक्ते भूतले बलवान्कलिः । करिष्यति परंविघ्नंसत्कार्येसमुपस्थिते
तस्माद्दिग्विजयं याहि कलिनिग्रहमाचर । अहंतुमासमात्रेणवैष्णवींरीतिमाश्रितः

श्रीमद्भागवतास्वादं प्रचार्य त्वत्साहायतः ।
एतान्सम्प्रापयिष्यामि नित्यधाम्नि मधुद्विषः ॥ ५६ ॥

श्रीसूत उवाच

श्रुत्वैवं तद्वचो राजा मुदितश्चिन्तयातुरः । तदाविज्ञापयामास स्वाभिप्रायं तमुद्धवम्

श्रीपरीक्षिदुवाच

कलिं तुनिग्रहीष्यामितात! तेवचसिस्थितः । श्रीभागवतसम्प्राप्तिकथंममभविष्यति

अहं तु समनुग्राह्यस्तव पादतले श्रितः ।

श्रीसूत उवाच

श्रुत्वैतद्वचनं भूयोऽप्युद्धवस्तमुवाच ह ॥ ५९ ॥

उद्धव उवाच

राजंश्चिन्ता तुतेकाऽपिनैवकार्य्याकथञ्चन । तवैवभगवच्छास्त्रेयतोमुख्याधिकारिता
एतावत्कालपर्य्यन्तं प्रायो भागवतश्रुतेः । वार्तामपि न जानन्तिमनुष्याःकर्मतत्पराः
त्वत्प्रसादेनबहवोमनुष्याभारताजिरे । श्रीमद्भागवतप्राप्तौसुखम्प्राप्स्यन्तिशाश्वतम्

नन्दनन्दनरूपस्तु श्रीशुको भगवानृषिः । श्रीमद्भागवतं तुभ्यं श्रावयिष्यत्यसंशयः
तेनप्राप्स्यसिराजंस्त्वंनित्यंधामव्रजेशितुः । श्रीभागवतसञ्चारस्ततोभुविभविष्यति
तस्मात्त्वं गच्छ राजेन्द्र! कलिनिग्रहमाचर ।

श्रीसूत उवाच

इत्युक्तस्तं परिक्रम्य गतो राजा दिशां जये ॥ ६५ ॥

वज्रस्तु निजराज्येशं प्रतिबाहुं विधाय च । तत्रैव मातृभिः साकंतस्थौभागवताशया
अथ वृन्दावने मासं गोवर्द्धनसमीपतः । श्रीमद्भागवतास्वादस्तूद्धवेन प्रवर्तितः ॥६७
तस्मिन्नास्वाद्यमाने तु सच्चिदानन्दरूपिणी । प्रचकाशे हरेर्लीला सर्वतः कृष्णएवच
आत्मानञ्च तदन्तःस्थं सर्वेऽपि ददृशुस्तदा । वज्रस्तु दक्षिणे दृष्ट्वा कृष्णपादसरोरुहे
स्वात्मानं कृष्णवैधुर्य्यान्मुक्तस्तद्भुव्यशोभत ।
ताश्चतन्मातरः कृष्णे रासरात्रिप्रकाशिनि ॥ ७० ॥

चन्द्रेकलाप्रभारूपमात्मानंवीक्ष्यविस्मिताः । स्वप्रेष्ठविरहव्याधिविमुक्ताःस्वपदंययुः
येऽन्ये च तत्रतेसर्वेनित्यलीलान्तरंगताः । व्यावहारिकलोकेभ्यःसद्योऽदर्शनमागताः
गोवर्द्धननिकुञ्जेषु गोषु वृन्दावनादिषु । नित्यं कृष्णेन मोदन्ते दृश्यन्ते प्रेमतत्परैः

श्रीसूत उवाच

य एतां भगवत्प्राप्तिं शृणुयाच्चाऽपि कीर्तयेत् । तस्यवैभगवत्प्राप्तिर्दुःखहानिश्चजायते

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
श्रीभागवतमाहात्म्ये परीक्षिदुद्धवसम्वादे तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

श्रीमद्भागवतमाहात्म्ये वक्तृश्रोतृश्रद्धावर्णनम्

श्रीऋषय ऊचुः

साधुसूत! चिरञ्जीवचिरमेवं प्रशाधि नः । श्रीभागवतमाहात्म्यमपूर्वं त्वन्मुखाच्छ्रुतम्
तत्स्वरूपप्रमाणञ्च विधिञ्च श्रवणे वद । तद्वक्तुर्लक्षणं सूतश्रोतुश्चापि वदाऽधुना ॥२

श्रीसूत उवाच

श्रीमद्भागवतस्याऽथश्रीमद्भगवतः सदा । स्वरूपमेकमेवास्तिसच्चिदानन्दलक्षणम्
श्रीकृष्णासक्तभक्तानां तन्माधुर्य्यप्रकाशकम् ।
समुज्जृम्भति यद्वाक्यं विद्धि भागवतं हि तत् ॥ ४ ॥

ज्ञानविज्ञानभक्त्यङ्गचतुष्टयपरं वचः । मायामर्दनदक्षञ्च विद्धिभागवतं च तत् ॥ ५ ॥
प्रमाणं तस्य को वेदह्यनन्तस्याक्षरात्मनः । ब्रह्मणे हरिणातद्दिक्चतुःश्लोक्याप्रदर्शिता
तदानन्त्यावगाहेन स्वेप्सितावहनक्षमाः । त एव सन्तिभोविप्राब्रह्मविष्णुशिवादयः
मितबुद्ध्यादिवृत्तीनां मनुष्याणां हिताय च ।
परीक्षिच्छुकसम्वादो योऽसौ व्यासेन कीर्तितः ॥ ८ ॥

ग्रन्थोऽष्टादशसाहस्रो योऽसौ भागवताभिधः । कलिग्राहगृहीतानां सएवपरमाश्रयः
श्रोतारोऽथनिरूप्यन्तेश्रीमद्विष्णुकथाश्रयाः । प्रवराअवराश्चेतिश्रोतारोद्विविधामताः
प्रवराश्चातकोहंसःशुकोमीनादयस्तथा । अवरावृकभूरुण्डवृषोष्ट्राद्याः प्रकीर्तिताः ॥
अखिलोपेक्षया यस्तुकृष्णशास्त्रश्रुतौव्रती । सचातकोयथाऽम्भोदमुक्तेपाथसिचातकः
हंसः स्यात्सारमादत्ते यः श्रोता विविधाच्छ्रुतात् ।
दुग्धेनैक्यङ्गतात्तोयाद्यथा हंसोऽमलं पयः ॥ १२ ॥

शुकःसुष्ठुमितंव्यक्तिव्यासंश्रोतॄंश्चहर्षयन् । सुपाठितःशुकोयद्वच्छिक्षकंपार्श्वगानपि
शब्दं नानिमिषो जातु करोत्यास्वादयन्रसम् ।

श्रोता स्निग्धो भवेन्मीनो मीनः क्षीरनिधौ यथा ॥ १५ ॥
यस्तुदन्त्रसिकाञ्छ्रोतृन्विरौत्यज्ञो वृको हि सः ।
वेणुस्वनरसासक्तान्वृकोऽरण्ये मृगान्यथा ॥ १६ ॥

भूरुण्डःशिक्षयेदन्याञ्छ्रुत्वानस्वयमाचरेत् । यथाहिमवतःशृङ्गेभूरुण्डाख्योविहङ्गमः सर्वं श्रुतमुपादत्ते सारासारान्यधीर्वृषः । स्वादुद्राक्षां खलिञ्चापि निर्विशेषंयथावृषः स उष्ट्रो मधुरं मुञ्चन्विपरीते रमेत यः । यथानिम्बंचरत्युष्ट्रोहित्वाऽऽम्रमपितद्युतम् अन्येऽपिबहवो भेदा द्वयोर्भृङ्गखरादयः । विज्ञेयास्तत्तदाचारैस्तत्तत्प्रकृतिसम्भवैः

यः स्थित्वाऽभिमुखम्प्रणम्य विधिवत्त्यक्तान्यवादो हरे-
र्लीलाः श्रोतुमभीप्सतेऽतिनिपुणो नम्रोऽथ क्लृप्ताञ्जलिः ।
शिष्यो विश्वसितोऽनुचिन्तनपरः प्रश्नेऽनुरक्तः शुचि-
र्नित्यं कृष्णजनप्रियो निगदितः श्रोता स वै वक्तृभिः ॥ २१ ॥
भगवन्मतिरनपेक्षः सुहृदो दीनेषु सानुकम्पो यः ।
बहुधा बोधनचतुरो वक्ता सम्मानितो मुनिभिः ॥ २२ ॥

अथ भारतभूस्थाने श्रीभागवतसेवने । विधिं शृणुत भोविप्रा येनस्यात्सुखसन्ततिः राजसं सात्त्विकं चापि तामसं निर्गुणं तथा । चतुर्विधं तु विज्ञेयं श्रीभागवतसेवनम् सप्ताहं यज्ञवद्यत्तु सश्रमं सत्वरं मुदा । सेवितं राजसंतत्तु बहुपूजादिशोभनम् ॥ २५ मासेन ऋतुना वापि श्रवणं स्वादसंयुतम् । सात्त्विकं यदनायासंसमस्तानन्दवर्द्धनम् तामसं यत्तुवर्षेणसालसंश्रद्धयाऽयुतम् । विस्मृतिस्मृतिसंयुक्तंसेवनंतच्चसौख्यदम् वर्षमासदिनानां तु विमुच्य नियमाग्रहम् । सर्वदा प्रेमभक्त्यैव सेवनं निर्गुणं मतम् ॥ पारीक्षितेऽपि सम्वादे निर्गुणंतत्प्रकीर्तितम् । तत्रसप्तदिनाख्यानंतदायुर्दिनसङ्ख्यया अन्यत्र त्रिगुणं चापि निर्गुणं च यथेच्छया । यथा कथञ्चित्कर्तव्यंसेवनंभगवच्छ्रुतेः येश्रीकृष्णविहारैकभजनास्वादलोलुपाः । मुक्तावपिनिराकाङ्क्षास्तेषांभागवतंधनम् येऽपि संसारसन्तापनिर्विण्णा मोक्षकाङ्क्षिणः । तेषां भवौषधंचैतत्कलौसेव्यंप्रयत्नतः

ये चाऽपि विषयारामाः संसारिकसुखस्पृहाः ।

तेषां तु कर्ममार्गेण या सिद्धिः साऽधुनाकलौ ॥ ३३ ॥

सामर्थ्यधनविज्ञानाभावादत्यन्तदुर्लभा । तस्मात्तैरपिसं सेव्या श्रीमद्भागवती कथा धनं पुत्रांस्तथादारान्वाहनादियशोगृहान् । असापत्न्यञ्च राज्यञ्च दद्याद्भागवती कथा इह लोके वरान्भुक्त्वा भोगान्वैमनसेप्सितान् । श्रीभागवतसङ्गेनयात्यन्तेश्रीहरेःपदम् यत्र भागवती वार्ता ये च तच्छ्रवणे रताः । तेषां संसेवनं कुर्याद्देहेन च धनेन च ३७ तदनुग्रहतोऽस्यापि श्रीभागवतसेवनम् । श्रीकृष्णव्यतिरिक्तंयत्तत्सर्वंधनसञ्ज्ञितम्

कृष्णार्थीति धनार्थीति श्रोता वक्ता द्विधा मतः ।
यथा वक्ता तथा श्रोता तत्र सौख्यं विवर्द्धते ॥ ३९ ॥

उभयोर्वैपरीत्येतु रसाभासेफलच्युतिः । किन्तुकृष्णार्थिनांसिद्धिर्विलम्बेनापिजायते

धनार्थिनस्तु संसिद्धिर्विधिसम्पूर्णतावशात् ।
कृष्णार्थिनोऽगुणस्यापि प्रेमैव विधिरुत्तमः ॥ ४१ ॥
आसमाप्ति सकामेन कर्तव्यो हि विधिः स्वयम् ।
स्नातो नित्य क्रियां कृत्वा प्राश्य पादोदकं हरेः ॥ ४२ ॥

पुस्तकञ्च गुरुञ्चैव पूजयित्वोपचारतः । ब्रूयाद्वा शृणुयाद्वापि श्रीमद्भागवतं मुदा ॥ पयसा वा हविष्येण मौनम्भोजनमाचरेत् । ब्रह्मचर्य्यमधःसुप्तिंक्रोधलोभादिवर्ज्जनम्

कथान्ते कीर्तनं नित्यं समाप्तौ जागरं चरेत् ।
ब्राह्मणान्भोजयित्वा तु दक्षिणाभिः प्रतोषयेत् ॥ ४५ ॥

गुरवे वस्त्रभूषादि दत्त्वा गाञ्च समर्पयेत् । एवं कृते विधाने तु लभतेवाञ्छितं फलम् दारागारसुतान्राज्यं धनादि च यदीप्सितम् । परन्तुशोभतेनात्रसकामत्वंविडम्बनम् कृष्णप्राप्तिकरं शश्वत्प्रेमानन्दफलप्रदम् । श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे श्रीमद्भागवतमाहात्म्ये वक्तृश्रोतृश्रद्धा निरूपणंनामचतुर्थोऽध्यायः ॥ ४ ॥

समाप्तमिदं श्रीमद्भागवतमाहात्म्यम् ।

——:०:——